## प्रथमचरमतयाल्पार्धकतिपयनेमाश्च । (३३/२२६)

'विभाषा जसि' (१.१.३२/२२५) इति[1] वर्तते। द्वन्द्वे इति निवृत्तम्। प्रथम चरम तय अल्प अर्ध कतिपय नेम इत्येते[2] जसि विभाषा [3]सर्वनामसञ्ज्ञा भवन्ति। प्रथमे, प्रथमाः। [4]चरमे, चरमाः। द्वितये, द्वितयाः। [5]अल्पे, अल्पाः। अर्धे,[6] अर्धाः। कतिपये, कतिपयाः। [7]नेमे, नेमाः। तय इति तयप्[8]प्रत्ययः। [9]शिष्टानि प्रातिपदिकानि। [10]तत्र नेम इति सर्वादिषु पठ्यते, तस्य प्राप्ते विभाषा, अन्येषामप्राप्ते[11]। उभयशब्दस्य तयप्प्रत्ययान्तस्य गणे पाठान्नित्या [12]सर्वनामसञ्ज्ञा इहापि [13]जस्कार्यं प्रति विभाषा। [14]काकच्चोर्यथायोगं वृत्तिः॥

## पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम्। (३४/२१८)

पूर्व पर अवर दक्षिण उत्तर अपर अधर इत्येषां गणे पाठात् पूर्वेण [15]नित्यायां सर्वनामसञ्ज्ञायां [16]प्राप्तायां जसि विभाषा आरभ्यते। पूर्वादीनि विभाषा जसि सर्वनामसञ्ज्ञानि भवन्ति व्यवस्थायामसञ्ज्ञायाम्।[17]स्वाभिधेयापेक्षावधिनियमो व्यवस्था। पूर्वे, पूर्वाः। परे, पराः। अवरे, अवराः। दक्षिणे, दक्षिणाः। उत्तरे, उत्तराः। अपरे, अपराः। अधरे, अधराः। व्यवस्थायाम् इति किम्? दक्षिणा इमे गाथकाः। प्रवीणाः इत्यर्थः। असञ्ज्ञायाम् इति किम्? उत्तराः कुरवः। सत्यामेव व्यवस्थायामियं तेषां सञ्ज्ञा॥

## स्वमज्ञातिधनाख्यायाम्। (३५/२१९)

[18]अत्रापि नित्या सर्वनामसञ्ज्ञा प्राप्ता जसि [19]विभाष्यते। स्वम् इत्येतच्छब्दरूपं जसि विभाषा सर्वनामसञ्ज्ञं भवति, न चेज् ज्ञातिधनयोः [20]सञ्ज्ञारूपेण वर्तते। स्वे पुत्राः, स्वाः पुत्राः। स्वे गावः, [21]स्वा गावः। आत्मीयाः[22] इत्यर्थः। ज्ञातिप्रतिषेधः इति [23]किम्?

धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव [24]संहताः।
उल्मुकानीव [25]मेऽमी स्वा ज्ञातयो भरतर्षभ॥[26] (महाभारते ५.३६.३८)

अधनाख्यायाम् इति किम्? प्रभूताः स्वा न दीयन्ते, प्रभूताः स्वा न भुज्यन्ते। प्रभूतानि धनानि इत्यर्थः॥

## अन्तरं बहिर्योगोपसंव्यानयोः। (३६/२२०)

अत्रापि पूर्वेण नित्या [27]सर्वनामसञ्ज्ञा प्राप्ता सा जसि [28]विभाष्यते। अन्तरमित्येतच्छब्दरूपं विभाषा जसि सर्वनामसञ्ज्ञं भवति बहिर्योगे उपसंव्याने च [29]गम्यमाने। अन्तरे गृहाः,[30] अन्तराः गृहाः। नगरबाह्याश्चाण्डालादिगृहा

---

1. इत्येव फ. ह, इत्यनुवर्तते क.ड. 2. इत्येतानि फ. 3. सर्वनामसञ्ज्ञानि फ. 4. चरमे चरमाः इति नास्ति फ. 5. तृतये तृतयाः इत्यधिकं ड, अल्पे अल्पाः इति नास्ति ड. 6. अर्धे नास्ति फ. ह. 7. नेमे, नेमाः इति नास्ति ग. 8. तयप् नास्ति फ. ह, तय नास्ति ड. 9. परिशिष्टानि क. ड, शिष्टानि इमानि ब. 10. तत्र नास्ति फ. 11. असमासे क. ब. 12. सञ्ज्ञा क, पूर्ववन्नित्या सञ्ज्ञा प्राप्ता जसि विभाषा आरभ्यते ड. 13. जसः कार्यं क. ग. फ. 14. पूर्वादीनि जसि विभाषा सर्वनामसञ्ज्ञानि भवन्ति इत्यधिकम् ह. 15. नित्यसञ्ज्ञायाम् फ. ह, नित्यायां प्राप्तायाम् अ. 16. प्राप्तायां नास्ति क. ह. 17. स्वाभिधेयापेक्षोऽवधिनियमो ई. 18. तत्रापि नित्या सञ्ज्ञा प्राप्ता फ. 19. विभाषा आरभ्यते अ. फ, इष्यते क. 20. सञ्ज्ञात्वेन ग. 21. स्वा गावः नास्ति फ. 22. गावः इत्यधिकम् क. 23. किमर्थः फ. ह. 24. संगताः ग. फ. ह. 25. ते मे ड. 26. धूमायन्ते व्यपेतानि ज्वलन्ति संहतानि च। धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ पु.प्र. 27. सञ्ज्ञा क. ड. 28. जसि विभाषा आरभ्यते अ. क. फ, अत्र नित्या सञ्ज्ञा प्राप्ता विभाष्यते ह. 29. उपसङ्गच्छते ग, गम्यमाने नास्ति अ.क.फ. 30. गताः ब.